# NCERT Solutions Class 8 Sanskrit (Deepakam)

# Chapter 2 अल्पानामपि वस्तूनां संहतिः कार्यसाधिका

## अभ्यासात् जायते सिद्धिः (पृष्ठ 19–22)

**१. अधोलिखितानां प्रश्नानाम् एकपदेन उत्तरं लिखत-**

**(क) मित्राणि ग्रीष्मावकाशे कुत्र गच्छन्ति ?**

**उत्तराणि :** उत्तराखण्डम्

**(ख) सर्वत्र कः प्रसृतः ?**

**उत्तराणि :** अन्धकारः

**(ग) कः सर्वान् प्रेरयन् अवदत् ?**

**उत्तराणि :** नायकः

**(घ) कः हितोपदेशस्य कथां श्रावयति ?**

**उत्तराणि :** नायकः

**(ङ) कपोतराजस्य नाम किम् ?**

**उत्तराणि :** चित्रग्रीवः

**(च) व्याधः कान् विकीर्य जालं प्रसारितवान् ?**

**उत्तराणि :** तण्डुलकणान्

**(छ) विपत्काले विस्मयः कस्य लक्षणम् ?**

**उत्तराणि :** कापुरुषस्य

**(ज) चित्रग्रीवस्य मित्रं हिरण्यकः कुत्र निवसति ?**

**उत्तराणि :** गण्डकीतीरे

**(झ) चित्रग्रीवः हिरण्यकं कथं सम्बोधयति ?**

**उत्तराणि :** भोः मित्र

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**(ञ) पूर्वं केषां पाशान् छिनतु इति चित्रग्रीवः वदति ?**

**उत्तराणि :**

आश्रितानाम्

**२. पूर्णवाक्येन उत्तरं लिखत-**

**(क) यदा केदारक्षेत्रम् आरोहन्तः आसन् किम् अभवत्?**

**उत्तराणि :** यदा केदारक्षेत्रम् आरोहन्तः आसन् तदा वेगेनं वृष्टिः आरब्धा।

**(ख) सर्वे उच्चस्वरेण किं प्रार्थयन्त ?**

**उत्तराणि :** सर्वे उच्चस्वरेण प्रार्थयन्त-हे भगवन्! रक्ष अस्मान्।

**(ग) असम्भवं कार्यं कथं कर्तुं शक्यते इति नायक : उक्तवान्?**

**उत्तराणि :** असम्भवं कार्यं आत्मविश्वासबलेन कर्तुं शक्यते इति नायकः उक्तवान्।

**(घ) निर्जने वने तण्डुलकणान् दृष्ट्वा चित्रग्रीवः किं निरूपयति ?**

**उत्तराणि :** चित्रग्रीवः निरूपयति यत् निर्जने वने तण्डुलकणानां सम्भवः कथम्।

**(ङ) किं नीतिवचनं प्रसिद्धम् ?**

**उत्तराणि :** लघूनाम् अपि वस्तूनां संहतिः कार्यसाधि का इति नीतिवचनं प्रसिद्धम् ।

**(च) व्याधात् रक्षां प्राप्तुं चित्रग्रीवः कम् आदेशं दत्तवान्?**

**उत्तराणि :** व्याधात् रक्षां प्राप्तुं चित्रग्रीवः कपोतान् आदेशं दत्तवान्।

**(छ) हिरण्यकः किमर्थं तूष्णीं स्थितः ?**

**उत्तराणि :** हिरण्यकः कपोतानाम् अवपातभयात् चकितः तूष्णीं स्थितः।

**(ज) पुलकित : हिरण्यकः चित्रग्रीवं कथं प्रशंसति ?**

**उत्तराणि :** पुलकित: हिरण्यकः चित्रग्रीवं प्रशंसति- आश्रितवात्सल्येन त्वं त्रैलोकस्याऽपि स्वामित्वं प्राप्तुं योग्योऽसि।

**(झ) कपोताः कथं आत्मरक्षणं कृतवन्तः ?**

**उत्तराणि :** कपोताः बुद्धिबलेन संघटनसामर्थ्येन च आत्मरक्षणं कृतवन्तः।

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**(ञ) नायकस्य प्रेरकवचनैः सर्वेऽपि किम् अकुर्वन्?**

**उत्तराणि :** नायकस्य प्रेरकवचनैः सर्वे भयं विहाय सेतुनिर्माणं कार्ये संलग्नाः जाताः ।

**३. अधोलिखितानि वाक्यानि पठित्वा ल्यप् प्रत्ययान्तेषु परिवर्तयत-**

**(क) छात्रः कक्षां प्रविशति । संस्कृतं पठति ।**

**छात्रः कक्षां <u>प्रविश्य</u> संस्कृतं पठति ।**

**(ख) भक्तः मन्दिरम् आगच्छति । पूजां करोति ।**

**उत्तराणि :** भक्तः मन्दिरम् <u>आगत्य</u> पूजां करोति ।

**(ग) माता भोजनं निर्माति। पुत्राय ददाति।**

**उत्तराणि :** माता भोजनं <u>निर्माय</u> पुत्राय ददाति ।

**(घ) सुरेशः प्रातः उत्तिष्ठति। देवं नमति।**

**उत्तराणि :** सुरेशः प्रातः <u>उत्थाय</u> देवं नमति ।

**(ङ) रमा पुस्तकं स्वीकरोति । विद्यालयं गच्छति ।**

**उत्तराणि :** रमा पुस्तकं <u>स्वीकृत्य</u> विद्यालयं गच्छति।

**(च) अहं गृहम् आगच्छामि । भोजनं करोमि ।**

**उत्तराणि :** अहं गृहम् <u>आगत्य</u> भोजनं करोमि ।

**(छ) तण्डुलकणान् विकिरति । जालं विस्तारयति ।**

**उत्तराणि :** तण्डुलकणान् <u>विकीर्य</u> जालं विस्तारयति ।

**(ज) व्याधः तण्डुलकणान् अवलोकते । भूमौ अवतरति ।**

**उत्तराणि :** व्याधः तण्डुलकणान् <u>अवलोक्य</u> भूमौ अवतरति ।

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**४. उदाहरणानुसारम् उपसर्गयोजनेन क्त्वा – स्थाने ल्यप्-प्रत्ययस्य प्रयोगं कृत्वा पदानि परिवर्तयत-**

| |
|---|
| सम्, आ, उप, उद्, वि, प्र |

**(क) छात्रः गृहं गत्वा भोजनं करोति ।**

**छात्रः गृहम् <u>आगत्य</u> (आ + गम् + ल्यप्) भोजनं करोति ।**

**(ख) माता वस्त्राणि क्षालयित्वा पचति ।**

____________________________________

**उत्तराणि :** माता वस्त्राणि <u>प्रक्षाल्य / संक्षाल्य</u> पचति ।

**(ग) शिक्षक: श्लोकं लिखित्वा पाठयति ।**

____________________________________

**उत्तराणि :** शिक्षक: श्लोकं <u>उल्लिख्य</u> पाठयति ।

**(घ) रमा स्थित्वा गीतं गायति ।**

____________________________________

**उत्तराणि :** रमा <u>उत्थाय</u> गीतं गायति ।

**(ङ) शिष्यः सर्वदा गुरुं नत्वा पठति ।**

____________________________________

**उत्तराणि :** शिष्यः सर्वदा गुरुं <u>प्रणभ्य</u> पठति ।

**(च) लेखकः आलोचनं कृत्वा लिखति।**

____________________________________

**उत्तराणि :** लेखकः आलोचनं <u>संस्कृत्य</u> लिखति ।

**५. पाठे प्रयुक्तेन उपयुक्तपदेन रिक्तस्थानं पूरयत-**

(क) सर्वै: एकचित्तीभूय ____________________________________ उड्डीयताम् ।

(ख) जालापहारकान् तान् ____________________________________ पश्चाद् अधावत्।

(ग) अस्माकं मित्रं ____________________________________ नाम मूषकराजः गण्डकीतीरे चित्रवने निवसति ।

Get More Learning Materials Here : CLICK HERE www.studentbro.in

(घ) हिरण्यकः कपोतानाम् ____________________________ स्थितः।

(ङ) यतोहि विपत्काले ____________________________ कापुरुषलक्षणम्।

**उत्तराणि :** (क) सर्वैः एकचित्तीभूय जालमादाय उड्डीयताम् ।

(ख) जालापहारकान् तान् अवलोक्य पश्चाद् अधावत्।

(ग) अस्माकं मित्रं हिरण्यको नाम मूषकराजः गण्डकीतीरे चित्रवने निवसति ।

(घ) हिरण्यकः कपोतानाम् अवपातभयेन चकितस्तूष्णीं स्थितः।

(ङ) यतोहि विपत्काले विस्मयः एव कापुरुष- लक्षणम्।

**६. पाठे प्रयुक्तेन ल्यप्प्रत्ययान्तपदेन सह उपयुक्तं पदं**




**उत्तराणि :**




**७. समासयुक्तपदेन रिक्तस्थानं पूरयत-**

**(क) गण्डक्याः तीरम् = गण्डकीतीरम्**

**तस्मिन् = गण्डकीतीरे**

**(ख) तण्डुलानां कणाः = ______________**

**तान् = ______________**

**उत्तराणि :** तण्डुलानां कणाः = तण्डुलकणाः

तान् = तण्डुलकणान्

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**(ग) जालस्य अपहारकाः = ______________**

**तान् = ______________**

**उत्तराणि :** जालस्य अपहारकाः = जालापहारकाः

तान् = जालापहारकान्

**(घ) अवपाताद् भयम् = ______________**

**तस्मात् = ______________**

**उत्तराणि :** अवपाताद् भयम् = अवपातभयम्

तस्मात् = अवपातभयात्

**(ङ) कापुरुषाणां लक्षणम् = ______________**

**तस्मिन् = ______________**

**उत्तराणि :** कापुरुषाणां लक्षणम् = कापुरुषलक्षणम्

तस्मिन् = कापुरुषलक्षणे

**८. सार्थकपदं ज्ञात्वा सन्धिविच्छेदं कुरुत-**

**(क) इत्याकर्ण्य = इति + आकर्ण्य ।**

**(ख) चित्रग्रीवोऽवदत् = चित्रग्रीवः + अवदत् ।**

(ग) बालकोऽत्र = ______________

(घ) धैर्यमथाभ्युदये = ______________

(ङ) भोजनेऽप्यप्रवर्तनम् = ______________

(च) नमस्ते = ______________

(छ) उपायश्चिन्तनीयः = ______________

(ज) व्याधस्तत्र = ______________

(झ) हिरण्यकोऽप्याह = ______________

(ञ) मूषकराजो गण्डकीतीरे = ______________

(ट) अतस्त्वाम् = ______________

(ठ) कश्चित् = ______________

**उत्तराणि :** (ग) बालकोऽत्र = बालकः + अत्र

(घ) धैर्यमथाभ्युदये = धैर्यम् + अथ + अभ्युदये

Get More Learning Materials Here : CLICK HERE www.studentbro.in

(ङ) भोजनेऽप्यप्रवर्तनम् = भोजने + अपि + अप्रवर्तनम्

(च) नमस्ते = नमः + ते

(छ) उपायश्चिन्तनीयः = उपायः + चिन्तनीयः

(ज) व्याधस्तत्र = व्याधः + तत्र

(झ) हिरण्यकोऽप्याह = हिरण्यकः + अपि + आह

(ञ) मूषकराजो गण्डकीतीरे = मूषकराजः + गण्डकीतीरे

(ट) अतस्त्वाम् = अतः + त्वाम्

(ठ) कश्चित् = कः + चित्

**योग्यताविस्तारः**

**ग्रन्थपरिचयः**

प्रस्तुतः पाठः हितोपदेशग्रन्थस्य मित्रलाभप्रकरणात् स्वीकृतः। अस्य ग्रन्थस्य लेखकः पण्डितः नारायणशर्मा अस्ति। अस्मिन् ग्रन्थे मूल्ययुक्तानां, नीतियुक्तानां च वचनानां, सुभाषितानां, कथानां च सङ्ग्रहः अस्ति। अतः अयं ग्रन्थः संस्कृतसाहित्ये अत्यन्तं समाद्रियते। अस्मिन् ग्रन्थे चत्वारि

**प्रकरणानि सन्ति –** (१) मित्रलाभः (२) सुहृद्भेदः

(३) विग्रहः (४) सन्धिः इति। अस्य अध्ययनेन छात्रः नीतिविद्यायां संस्कृतभाषायां च निपुणो भवति।

अल्पानामपि वस्तूनां संहतिः कार्यसाधिका।

तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः॥ (हितोपदेशः १.३६)

पदच्छेदः – अल्पानाम् अपि वस्तूनाम् संहतिः कार्य-साधिका। तृणैः गुणत्वम् आपन्नैः बध्यन्ते मत्त-दन्तिनः।

अन्वयः – अल्पानाम् अपि वस्तूनां संहतिः कार्य-साधिका। गुणत्वम् आपन्नैः तृणैः मत्त-दन्तिनः बध्यन्ते।

भावार्थः – स्वल्पानां, निर्बलानामपि वस्तूनां संहतिः अर्थात् सङ्घः, समुदायः लक्ष्यसिद्धौ सहायिका भवति। यथा – घाससमूहेन निर्मितरज्जुद्वारा गजेन्द्रा अपि बद्धाः भवन्ति।

विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः।

यशसि चाभिरुचिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनाम्॥ (हितोपदेशः १.३२)

Get More Learning Materials Here : CLICK HERE www.studentbro.in

पदच्छेदः – विपदि धैर्यम् अथ अभ्युदये क्षमा सदसि वाक्-पटुता युधि विक्रमः। यशसि च अभिरुचिः व्यसनम् श्रुतौ प्रकृति-सिद्धम् इदम् हि महात्मनाम्।
अन्वयः – अथ विपदि धैर्यम्, अभ्युदये क्षमा, सदसि वाक्-पटुता, युधि विक्रमः, यशसि अभिरुचिः, श्रुत व्यसनं च इदं हि महात्मनां प्रकृति-सिद्धं भवति।
भावार्थः – महापुरुषाणाम् एतत् आचरणं स्वभावसिद्धमेव भवति। यत्किमपि भवेत् ते विपत्काले धैर्यमवलम्ब्य समस्यापरिहारविषये प्रयत्नं कुर्वन्ति। सम्पत्तौ उन्नतौ च ते सर्वान् उपकुर्वन्ति। सभायां ते कौशलेन भाषणं कुर्वन्ति। युद्धे ते पराक्रमं शौर्यं च दर्शयन्ति। यशोविषये ते अभिरुचिं प्रदर्शयन्ति। शास्त्रविषये च ते अनुरागं प्रकटयन्ति।

**परियोजनाकार्यम्**

**१. पाठात् अधोलिखितानां क्रियापदानां प्रयोगकौशलं ज्ञात्वा तत्समानानि अन्यानि वाक्यानि रचयत — तिरस्कुर्वन्ति, क्रियताम्, निवसति, आह, छेत्स्यति, सम्भाषसे, अब्रवीत्, उपसर्पति, युज्यते**

**यथा – तिरस्कुर्वन्ति – दुर्जनाः सज्जनं तिरस्कुर्वन्ति ।**

(क) ______________________________

(ख) ______________________________

(ग) ______________________________

(घ) ______________________________

(ङ) ______________________________

(च) ______________________________

(छ) ______________________________

(ज) ______________________________

**२. अनया कथया वयं स्वजीवने कां शिक्षां स्वीकर्तुं शक्नुमः इति अधिकृत्य कक्षायां परिचर्चां कुर्वन्तु।**

अत्र इदम् अवधेयम्

ल्यप्-प्रत्ययः
यत्र एकस्याः क्रियायाः समाप्तेः अनन्तरम् उत्तरक्रिया भवति तत्र पूर्वकालिके क्रियाव्यवहारे धातोः क्त्वाप्रत्ययः भवति। तत्रैव यदि धातोः पूर्वं किमपि उपसर्गादिपदं भवति तर्हि क्त्वा-प्रत्ययस्थाने ल्यप् भवति । ल्यप् प्रत्यये य-मात्रम् अवशिष्यते । क्त्वा – ल्यप् प्रत्ययान्तानि पदानि अव्ययानि भवन्ति ।

Get More Learning Materials Here : CLICK HERE www.studentbro.in

अस्य वाक्येषु प्रयोगः क्त्वा – प्रत्ययवत् भवति।

जहाँ एक क्रिया की समाप्ति के पश्चात् उत्तर क्रिया होती है, वहाँ पूर्वकालिक क्रिया के व्यवहार में धातु से ‘क्त्वा ‘ प्रत्यय होता है, वहीं ही यदि धातु से पूर्व कोई भी उपसर्गपद होता है, तो ‘क्त्वा’ प्रत्यय के स्थान पर ‘ल्यप्’ होता है। ‘ल्यप्’ प्रत्यय का ‘य’ मात्र शेष रहता है। क्त्वा प्रत्ययान्त और ल्यप् प्रत्ययान्त पद अव्यय होते हैं। इसका वाक्यों में प्रयोग क्त्वा प्रत्यय के समान होता है।

यथा— तण्डुलकणान् अवलोक्य (अव + लोक् + ल्यप्) कपोतान् प्रति आह।
धैर्यम् अवलम्ब्य (अव + लम्ब् + ल्यप्) प्रतीकारः चिन्त्यताम् ।

**<u>विसर्गसन्धिः</u>**

यत्र विसर्गात् परं चकारः अथवा छकारः भवति तत्र विसर्गस्य स्थाने शकारः भवति ।
जब विसर्ग से परे चकार अथवा छकार होता है, वहाँ विसर्ग के स्थान पर शकार होता है।

यथा- कः + चित् = कश्चित् ।
प्रतीकारः + चिन्त्यताम् = प्रतीकारश्चिन्त्यताम्।
देवदत्तः + छलेन = देवदत्तश्छलेन ।

यत्र विसर्गात् परं तकारः अथवा थकारः भवति तत्र विसर्गस्य स्थाने सकारः भवति ।
जहाँ विसर्ग से पूर्व तकार अथवा थकार होता है, वहाँ विसर्ग के स्थान पर सकार होता है।

यथा – चकितः + तूष्णीम् = चकितस्तूष्णीम् ।
नीतिः + तावत् = नीतिस्तावत् ।

यदि विसर्गात् पूर्वम् अकारः परं च वर्गस्य तृतीयवर्णः, चतुर्थवर्णः, पञ्चमवर्णः तथा ह य व र ल इत्येतेषु कोऽपि वर्णः भवति तर्हि अकारस्य विसर्गस्य च (अः) स्थाने ओकारो भवति ।
यदि विसर्ग से पूर्व अकार हो और परे वर्ग का तृतीय, चतुर्थ, पञ्चम वर्ण, ह, य, व, र, ल इनमें से कोई वर्ण हो तो अकार और विसर्ग ( = अः) के स्थान पर ओकार होता है।
यथा – हिरण्यकः + नाम = हिरण्यको नाम।
ततः + हिरयण्यकः = ततो हिरण्यकः ।
व्याधः + निवृत्तः = व्याधो निवृत्तः ।

Get More Learning Materials Here : CLICK HERE www.studentbro.in

यदि विसर्गात् पूर्वं पश्चात् च अकारः भवति तत्र पूर्वतनस्य अकारस्य स्थाने विसर्गस्य च (अ:) स्थाने ओकारः भवति ।

यदि विसर्ग से पूर्व और पश्चात् अकार होता है, वहाँ पूर्व वाले अकार के स्थान पर और विसर्ग के स्थान पर ओकार होता है।

यथा- कुतः + अत्र हितः + अपि = कुतोऽत्र। हितोऽपि ।

सः + अस्माकं = सोऽस्माकम् ।

Get More Learning Materials Here : CLICK HERE www.studentbro.in